हरीतकीं मूत्रसिद्धां सतैललवणान्विताम् ।
प्रातःप्रातश्च सेवेत कफवातामयापहाम् ॥
गोमूत्रपिष्टां रुवुतैलभृष्टां
हरीतकीं सैन्धवचूर्णयुक्ताम् ।
खादेन्नरः कोष्णजलानुपानां
निहन्ति वृद्धिं चिरजां प्रवृद्धाम् ॥
त्रिफलाक्वाथगोमूत्रं पिबेत् प्रातरतन्द्रितः ।
कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितम् ॥
सरलागुरुकुष्ठानि देवदारुमहौषधम् ।
मूत्रारनालसंपिष्टं शोथघ्नं कफवातनुत् ॥
त्रिफलाक्वाथगोमूत्रं कल्कः पथ्यासमुद्भवः ।
कृष्णासैन्धवसंयुक्तो वृद्धिरोगहरः परः ॥
गव्यं घृतं सैन्धवसंप्रयुक्तं
शम्बूकभाण्डे निहितं प्रयत्नात् ।
सप्ताहमादित्यकरैर्व्विपक्वं
निहन्ति कुरण्डमतिप्रवृद्धम् ॥
ऐन्द्रीमूलभवं चूर्णं रुवुतैलेन मर्द्दितम् ।
अहाद्गोपयसा पीतं सर्व्ववृद्धिनिवारणम् ॥
रुद्रजटामूललिप्ता करटव्यङ्गचर्म्मणा ।
बद्धा वृद्धिः शमं याति चिरजापि न संशयः ॥
निपिष्टेनारनालेन रूपिकामूलवल्कलम् ।
लेपोवृद्ध्यामयं हन्ति बद्धमूलमपि दृढ़म् ॥
वचासर्षपकल्केन लेपो वृद्धिविनाशनः ।
लज्जाम्लशमलाभ्यान्तु लेपो वृद्धिहरः परः” ॥ * ॥
“मूलं बिल्वकपित्थयोररलुकस्याग्नेर्बृहत्योर्द्वयोः
श्यामापूतिकरञ्जशिग्रुकतरोर्व्विश्वौषधारुष्करम् ।
कृष्णाग्रन्थिकचव्यपञ्चलवणं क्षाराजमोदान्वितं
पीतञ्चाम्लिककोष्णतोयमथितैश्चूर्णीकृतं शस्त्रजित् ॥
अवीक्षीरेण गोधूमकल्कं कुन्दुरुकस्य वा ।
प्रलेपनं सुखोष्णं स्यात् शस्त्रशूलहरं परम् ॥
स्नुत्पात्रे तु वै काकोदरे तत्तु प्रवेशयेत् ।
शस्त्रं मुहूर्त्तं मेधावी तद्दंशादरुजो भवेत् ॥
अजाजी हबुषा कुष्ठं गोधूमं बदराणि च ।
काञ्जिकेन समं पिष्ट्वा कुर्य्याच्छस्त्रप्रलेपनम् ॥
सैन्धवं मदनं कुष्ठं शताह्वां निचुलं वचाम् ।
ह्रीवेरं मधुकं भार्गीं देवदारु सनागरम् ॥
कट्फलं पौष्करं मेदां चविकां चित्रकं शटीम् ।
विडङ्गातिविषे श्यामां रेणुकां नीलिनीं स्थिराम् ॥
बिल्वाजमोदां कृष्णाञ्च दन्तीं रास्नां प्रपिष्य च ।
साध्यमेरण्डजं तैलं तैलं वा कफवातनुत् ॥
शस्त्रोदरार्त्तगुल्मार्शःशोथमेहाढ्यमारुतान् ।
आनाहमश्मरीञ्चैव हन्यात्तदनुवासनात्” ॥
वृहत्सैन्धवाद्यं तैलम् ॥
“सौरेश्वरघृतं योज्यं शस्त्रवृद्धिनिवृत्तये” ॥
इतिशस्त्रवृद्ध्यधिकारः । इति चक्रपाणिदत्तः ॥ * ॥
(अस्य सनिदानं पूर्व्वरूपसहितं लक्षणं संप्राप्तिश्च यथा । “वातपित्तश्लेष्मशोणितमेदो मूत्रान्त्रनिमित्ताः सप्त वृद्धयः । तासां मूत्रान्त्रनिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः । अधः प्रकुपितोऽन्यतमो हि दोषः फलकोषवाहिनीरभिप्रपद्य धमनीः फलकोषयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते । तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोषशोफश्चेति ।
तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषामनिमित्तानिलरुजं वातवृद्धिमाचक्षते, पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवती चाशुसमुत्थानपाकां पित्तवृद्धिं कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिं कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम् ॥ मूत्रसन्धारण-शीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा दृतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां वृषणयोःश्वयथुं कोषयोश्चापादयति तां मूत्रवृद्धिं विद्यात् ॥ भारहरणबलवद्विग्रहवृक्षप्रपतनादिभिरायासविशेषैर्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्येतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोषं प्रविश्य मुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दमवपीड़ितश्चोर्द्ध्वमुपैति विमुक्तश्च पुनराध्मति तामन्त्रवृद्धिमसाध्यामाचक्षते” ॥ * ॥ इति सुश्रुते निदानस्थाने । १२ अध्याये ॥
चिकित्सितञ्चास्य यथा,—
“अन्त्रवृद्धा विना षड़् या वृद्धयस्तासु वर्जयेत् ।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ॥
अत्याशनमवङ्क्रमणमुपवासं गुरूणि च ।
तत्रादितो वातवृद्धौ स्नेहतस्निग्धमातुरम् ॥
स्विन्नञ्चैनं यथान्यायं पाययेत विरेचनम् ।
कोशाम्रतिल्वकैरण्डफलतैलानि वा नरम् ॥
सक्षीरं वा पिबेन्मासं तैलमेरण्डसम्भवम् ।
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ॥
निरूहयेन्निरूढ़ञ्च भुक्तवन्तं रसौदनम् ।
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्नेहोपनाहौ कुर्य्याच्च प्रदेहांश्चानिलापहान् ॥
विदग्धां पाचयित्वा वा सेवनीं परिवर्ज्जयेत् ॥
भिन्द्यात्ततः प्रभिन्नायां यथोक्तं क्रममाचरेत् ।
पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः ॥
पक्वां वा भेदयेद्भिन्नां शोधयेत् क्षौद्रसर्पिषा ।
शुद्धायाञ्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम् ॥
रक्तजायां जलौकोभिः शोणितं निर्हरेद्भिषक् ।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतम् ॥
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा ।
वृद्धिं कफात्मिकामुष्णैर्मूत्रपिष्टैः प्रलेपयेत् ॥
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ।
विम्लापनादृते वापि श्लेष्मग्रन्थिक्रमो हितः ।
पक्वायाञ्च विभिन्नायां तैलं शोधनमिष्यते ॥
सुमनारुष्करांशोठसप्तपर्णेषु साधितम् ।
मेदःसमुत्थां संस्वेद्य लेपयेत् सुरसादिना ॥
शिरोविरेकद्रव्यैर्व्वा सुखोष्णैर्मूत्रसंयुतैः ।
स्विन्नाञ्चावेष्ट्य पट्टेन समाश्वास्य तु मानवम् ॥
रच्छेत् फले सेवनीञ्च वृद्धिपत्रेण दारयेत् ।
मेदस्ततः समुद्धृत्य दद्यात्कासीससैन्धवे ।
बध्नीयाच्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।
मनःशिलालवणैः सिद्धमारुष्करेषु च ॥
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन तु ॥
अथात्र विमुखां नाड़ीं दत्त्वा विस्रावयेद्भिषक् ।
मूत्रं नाड़ीमथोद्धृत्य स्थगिकाबन्धमाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्जयेदन्त्रहेतुकीम् ।
अप्राप्तफलकोशायां वातवृद्धिक्रमो हितः ।
तत्र यां वङ्क्षणस्था तां दहेदर्द्धेन्दुवक्रया ।
सम्यग्मार्गावरोधार्थं कोशप्राप्तान्तु वर्जयेत् ।
त्वचं भित्त्वाङ्गुष्ठमध्ये दहेच्चाङ्गविपर्य्ययात् ॥
अनेनैव विधानेन वृद्धी वातकफात्मिके ।
प्रदहेत् प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ॥
शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् ।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये” ॥
इति सुश्रुते चिकित्सितस्थाने १९ अः ॥ * ॥)
भावप्रकाशोक्तचिकित्सादिः अन्त्रवृद्धिशब्दे द्रष्टव्यः ॥
साकवण्डवृक्षः । इति राजनिर्घण्टः ।

कुरण्टकः, पुं, (कुर्य्यते शब्द्यते इति । कुर् + बाहुलकात् अण्टक् । पृषोदरात् साधुः । ततः स्वार्थे कन् ।) कुरण्टकवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कुरण्टकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कुररः, पुं, (कुङ्शब्दे + “कुवः क्ररन्” । उणां २ । १३३ । इति क्ररन् प्रत्ययः ।) कुरलपक्षी । तत्पर्य्यायः । उत्क्रोशः २ । इत्यमरः । २ । ५ । २३ ॥ खरशब्दः ३ क्रौञ्चः ४ पंक्तिचरः ५ खरः ६ । इति राजनिर्घण्टः ॥ (यथा महाभारते ३ नलोपाख्यानपर्व्वणि । ६४ । ११० ।
“प्रोद्घुष्टां क्रौञ्चकुररैश्चक्रवाकोपकूजिताम्” ॥
अयं जलचरान्तर्गतपक्षिविशेषः । यथा,—
“कुररबकमकराः कङ्कचटकपिकमद्गुसारसाः ।
आड़िदात्यूहहंसा जलकरटिकपिङ्गा टिट्टिभाद्याः ।
जलेचरा विहङ्गास्ते भासकाः खञ्जरीटकाः ।
इत्येते जलजा जीवाः” ॥ इति हारीते प्रथमे स्थाने ११ अध्याये ॥)

कुरराङ्घ्रिः, पुं, (कुररस्य अङ्घ्रिरिव ।) देवसर्षपः । इति राजनिर्घण्टः ॥

कुररी, स्त्री, (कुरर + स्त्रियां जातित्वात् ङीष् ।) मेषी । इति हेमचन्द्रः ॥ कुररपक्षिस्त्री । इत्यमरः ॥ (यथा, महाभारते । १ । ६ । १२ ।
“ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव” ॥)

कुरलः, पुं, (कुरर इति रस्य लः ।) कुररपक्षी । चूर्णकुन्तलः । इति धरणी ॥

कुरवः, पुं, (कु ईषत् रवः गुञ्जनध्वनिर्मधुकराणां स्वल्पमधुतया यत्र ।) सितमन्दारः । इति राजनिर्घण्टः ॥ कुरवकः । रक्तझिण्टी । इति शब्दरत्नावली ॥ पीतझिण्टी । इति हेमचन्द्रः ॥ (कुत्सितो रव इति कर्म्मधारयः ।) कुत्सितशब्दः ॥ (कुत्सितो रवो यस्य ।) कुत्सितशब्दयुक्ते त्रि ॥

कुरवकः, पुं, (कुरव + स्वार्थे कन् ।) रक्ताम्लानः । रक्तझिण्टी । इति राजनिर्घण्टः ॥ (यथा राजेन्द्रकर्णपूरे ६५ ।
“किञ्चित्कुञ्चितलोचनपुटं कण्डूं मुकुरगण्डयोः